# विश्वेश्वर नीराजनम्

## Vishveshvara Neeraajanam

विश्वेश्वरनीराजनम्

सत्यं ज्ञानं शुद्धं पूर्णं हृदि भातं, वन्दे शम्भुं शान्तं मायागुणरहितम् ।
साक्षिरूपं तत्त्वं विद्वद्भिर्गम्यं, वेदैर्ज्ञेयं नित्यं गुरुभक्तैर्वेद्यम् ।
औम् हर हर हर महादेव ॥१॥

देवान् भीतान् दृष्ट्वा यः कृपयाविष्टो, विषपानमपि कृत्वाऽसितकण्ठो जातः ।
त्रिपुरं विमिदे युद्धे दुर्भेद्यं सर्वैस्तं वन्दे सर्वेशं देवैर्हृदि ध्यातम् ।
औम् हर हर हर महादेव ॥२॥

विघ्नविनाशनकर्ता भवतां यस्तातः पूज्यो निखिलैर्देवैर्दुरितं हरतु नः ।
स्कन्दः पुत्रो बलवान् तारकासुरहन्ता स्वमात्रे वरदाता ब्रह्मचर्यम् धर्ता ।
औम् हर हर हर महादेव ॥३॥

दशमुखबाणप्रभृतयो भक्तास्ते जाताः, नाहं वक्तुं शक्तः परिगणनं कृत्वा ।
ये देवानामैश्वर्यं स्वाधीनं चक्रुः तेषां चित्रं वीर्यं तव कृपया जातम् ।
औम् हर हर हर महादेव ॥४॥

पूजां कर्तुं विष्णुर्नेत्रं त्वयि समर्प्य, राज्यं कुरुते जगतां त्रयाणां तव दृष्ट्या ।
यतीनां हृदये स्थित्वा कामं नाशयिता, गङ्गाधर शिव शङ्कर गिरिजाधीशस्त्वम् ।
औम् हर हर हर महादेव ॥५॥

संहर्तृ शिवरूपमुग्रं तव ध्यात्वा भीता देवाःसर्वे भक्तिं त्वयि चक्रुः ।
दुःखं दृष्ट्वा जगति शरणं त्वां यामो देवानामपि देवं महादेवं प्रणुमः ।
औम् हर हर हर महादेव । ६॥

त्यक्त्वा धर्मं ब्रह्मा दुहितर्यासक्तः, दण्डं प्राप्तस्त्वत्तः पन्थानं नीतः ।
विद्योपदेष्टुस्त्वत्तः सनकाद्या भक्ताः, उपदेशं शृण्वन्ति वैराग्ये सक्ताः ।
औम् हर हर हर महादेव ॥७॥

प्राणान्ते वै काश्यां मुक्तिं सर्वेभ्यो वेदपुराणैः कथितां ददते नित्यं यः
सर्वज्ञं तमनादिं स्तौति यो भक्त्या, अर्थं कामं धर्मं मोक्षं लभते सः ।
औम् हर हर हर महादेव ॥८॥

इत्यच्युतानन्दगिरिविरचितं विश्वेश्वरनीराजनं संपूर्णम् ॥